श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री मुक्कूर् लक्ष्मीनृसिंहस्वामिना अनुगृहीतं

# ॥ श्री मट्टपल्लिमङ्गळाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मट्टपल्लिमङ्गळाष्टकम् ॥

मट्टपल्लिनिवासाय मधुरानन्दरूपिणे।
महायज्ञस्वरूपाय श्रीनृसिंहाय मङ्गळम् ॥ 1 ॥

कृष्णवेणीतटस्थाय सर्वाभीष्टप्रदायिने।
प्रह्लादप्रियरूपाय श्रीनृसिंहाय मङ्गळम् ॥ 2 ॥

गर्तस्थिताय धीराय गम्भीराय महात्मने।
सर्वारिष्ट विनाशाय श्रीनृसिंहाय मङ्गळम् ॥ 3 ॥

ऋग्यजुस्सामरूपाय मन्त्रारूढाय धीमते।
श्रितानां कल्पवृक्षाय श्रीनृसिंहाय मङ्गळम् ॥ 4 ॥

गुहाशयाय गुह्याय गुह्यविद्यास्वरूपिणे।
कुहरान्ते विहाराय श्रीनृसिंहाय मङ्गळम् ॥ 5 ॥

श्रीपल्यद्रिमध्यस्थाय निधये मधुराय च।
सुखप्रदाय देवाय श्रीनृसिंहाय मङ्गळम् ॥ 6 ॥

तापनीयरहस्याय तापत्रय विनाशिने।
नतानां पारिजाताय श्रीनृसिंहाय मङ्गळम् ॥ 7 ॥

राज्यलक्ष्म्या समेताय रागद्वेष विनाशिने।
मट्टपल्लि निवासाय श्रीनृसिंहाय मङ्गळम् ॥ 8 ॥

मुक्कूर् नृसिंहदासेन प्रोक्तं मङ्गळमद्भुतम्।
यः पठेत् श्रद्धया भक्त्या सर्वपापैः प्रमुच्यते॥ 9॥

॥ श्री मट्टपल्लिमङ्गळाष्टकं समाप्तम्॥